ॐ श्री गणेशाय नमः

# शिवपंचाक्षरीमंत्रप्रयोगविधिः :—

## ॐ नमः शिवाय

ॐ अस्य श्रीशिवपंचाक्षरीमंत्रस्य वामदेव ऋषिः, पंक्तिः छन्दः, शिवो देवता, मं बीजं, यं शक्तिः, वां कीलकं, सदाशिवकृपाप्रसादोपलब्धिपूर्वकाखिलपुरुषार्थ — सिद्धये जपे विनियोगः।

**अथ ऋष्यादिन्यासः :—**

ॐ अस्य श्रीशिवपंचाक्षरीमंत्रस्य वामदेवर्षये नमः —शिरसि, ॐ पंक्तिछन्दसे नमः —मुखे, ॐ शिवाय देवतायै नमः —हृदये, ॐ मं बीजाय नमः —गुह्ये, ॐ यं शक्तये नमः —पादयोः, ॐ वां कीलकाय नमः —नाभौ, ॐ सदाशिवकृपा प्रसादोपलब्धिपूर्वकाखिलपुरुषार्थसिद्धये जपे विनियोगाय नमः —सर्वांगे।

| मन्त्राः | अथ करन्यासः | अथ हृदयादिन्यासः |
|---|---|---|
| ॐ ॐ नमः | अंगुष्ठाभ्यां नमः | हृदयाय नमः |
| ॐ नं नमः | तर्जनीभ्यां नमः | शिरसे स्वाहा |
| ॐ मं नमः | मध्यमाभ्यां नमः | शिखायै वषट् |
| ॐ शिं नमः | अनामिकाभ्यां नमः | कवचाय हुम् |
| ॐ वां नमः | कनिष्ठिकाभ्यां नमः | नेत्रत्रयाय वौषट् |
| ॐ यं नमः | करतलकरपृष्ठाभ्यां नमः | अस्त्राय फट् |

ॐ भूर्भुवःस्वरोमिति दिग्बन्धः।

**अथ ध्यानम् :—**

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं,
रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं,
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रं।।



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

कैलासपीठासनमध्यसंस्थं भक्तैः सनन्दादिभिरर्च्यमानं।
भक्तार्तिदावानलहाप्रमेयं ध्यायेदुमालिंगितविश्वभूषणम्।।

<u>अथ जपः</u> :–

संकल्पानुसारेण यथाशक्तिर्वा पंचाक्षरीमंत्रजपं कुर्यात्।।

## <u>अथ अष्टमूर्तिशिवाष्टकस्तोत्र</u> :–

त्वम्भाभिराभिरभिभूय तमसमस्त, मस्तं नयस्यभिमतानि निशाचराणाम्।
देदीप्यसे दिवमणे गगनेहिताय, लोकत्रयस्य जगदीश्वर तन्नमस्ते।।1।।
( सूर्यतत्त्व )

लोकेऽतिवेलमतिवेलमहामहोदधि, निर्भासिकौचगगनेऽखिललोकनेत्रः।
विद्रावितखिलतमास्सुतमो हिमांशो, पीयूषपूरपरिपूरित तन्नमस्ते।।2।।
( चन्द्रतत्त्व )

त्वं पावने पथि सदागतिरप्युपास्यः, कस्त्वां विना भुवनजीवन जीवतीह।
स्तब्धप्रभंजनविवर्धितसर्वजन्तो, संतोषिताहिकुल सर्वग वै नमस्ते।।3।।
( पृथिवीतत्त्व )

पानीयरूप परमेश जगत्पवित्र, चित्रातिचित्रसुचरित्र करोषि नूनम्।
विश्वं पवित्रममलं किल विश्वनाथ, पानीयगाहनत एतदतो नतोऽस्मि।।4।।
( जलतत्त्व )

विश्वम्भरात्मक बिभर्षि विभोऽत्र विश्वं, को विश्वनाथ भवतोऽन्यतमस्तमोऽरिः।
स त्वं विश्वनाथ तमो मम चाहिभूष, स्तव्यात्परः परस्परं प्रणतस्ततस्त्वां।।5।।
( अग्नितत्त्व )

विश्वैकपावक नतावक पावकैक, –शक्ते ऋते मृतवतामृतदिव्यकार्यम्।
प्राणिष्वदो जगदहो जगदान्तरात्मं, स्त्वं पावकः प्रतिपदं शमदो नमस्ते।।6।।
( वायुतत्त्व )

आकाशरूपबहिरन्तरुतावकाश, –दानादविकस्वरमिहेश्वर विश्वमेतत्।
त्वत्तस्सदा सदय संश्वसिति स्वभावात्संकोचमेति भवतोऽस्मि नतस्ततस्त्वां।।7।
( आकाशतत्त्व )

आत्मस्वरूप तव रूपपरम्पराभि, –राभिस्ततं हर चराचररूपमेतत्।
सर्वान्तरात्मनिलय प्रतिरूपरूप, नित्यं नतोऽस्मि परमात्मजनोऽष्टमूर्ते।।8।।
( आत्मतत्त्व )

इत्यष्टमूर्तिभिरिमाभिरबन्धबन्धो, युक्तः करोषि खलु विश्वजनीनमर्ते।
एतत्ततं सूक्तिं प्रणतः प्रणीत, सर्वार्थसार्थपरमार्थ ततो नतोऽस्मि।।9।।

।। इत्यष्टमूर्तिशिवाष्टकस्तोत्रं संपूर्णम्।।
।। इत्यों शम्।।



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM